# Gurumahima Vimshatih

# ગુરુમહિમવિંશતિઃ

## Document Information

Text title : Gurumahimavimshatih

File name : gurumahimaviMshatiH.itx

Category : deities_misc, gurudev, nimbArkAchArya, viMshati

Location : doc_deities_misc

Author : rAsabihArIdAsa kAThiyAbAbA

Proofread by : Mohan Chettoor

Latest update : January 28, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 28, 2023

*sanskritdocuments.org*

# ગુરુમહિમવિંશતિઃ

॥ શ્રી ભગવન્નિમ્બાર્કાચાર્યાય નમઃ ॥

॥ શ્રી રાધાસર્વેશ્વરો વિજયતે ॥

આચાર્યપ્રવરં નિત્યં દિવ્યલક્ષણભૂષિતમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧॥

વેદવેદાન્તતત્ત્વજ્ઞં શ્રીવેદધર્મરક્ષકમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૨॥

શ્રીસદ્ગુરુકૃપાધન્યં સર્વશાસ્ત્રવિશારદમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૩॥

આવિર્ભૂતં મહારમ્યે રાજસ્થાને સુભારતે ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૪॥

જ્યોતિર્મયતનું ધીરં હૃદન્ધકારનાશનમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૫॥

સ્મયમાનાનનં ભવ્યં પઞ્ચકેશસમન્વિતમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૬॥

તીર્થાટનં કૃતં યેન લોકકલ્યાણહેતવે ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૭॥

યુગલસાધનાસિદ્ધં શ્રીધામતત્ત્વકોવિદમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૮॥

યુગલકીર્ત્તને લીનં લીલાસઙ્કીર્ત્તનપ્રિયમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૯॥

કૃપાલું ચ દયાલું તં હ્યાર્તજનસમાશ્રયમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૦॥

વેદાન્તતત્ત્વવક્તારં રચિતાનેકપુસ્તકમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૧॥

મહાશયં મહાભાગં જનમનોમહોત્સવમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૨॥

ભૂષણં સમ્પ્રદાયસ્યાચાર્યપીઠવિરાજિતમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૩॥

નિર્માપિતસુગોશાલા-ચિકિત્સાલયમન્દિરમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૪॥

સમ્મેલનેષ્વનેકેષુ હ્યધ્યક્ષપદશોભિતમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૫॥

દેશેષુ ચ વિદેશેષુ સમ્પ્રદાયપ્રચારકમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૬॥

ધર્માચાર્યસમસ્તૈશ્ચ પૂજિતાઙ્ઘ્રિપદ્દ્વયમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૭॥

શ્રીમન્નિમ્બાર્કસિદ્ધાન્તસારજ્ઞં પુણ્યદર્શનમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૮॥

શ્રીનિમ્બાર્કસ્વરૂપં ચ હ્યાદર્શાચાર્યલક્ષણમ્ ।
રાધાસર્વેશ્વરં વન્દે શરણાન્તં જગદ્ગુરુમ્ ॥ ૧૯॥

અહો! આચાર્યપાદં તં ભગવચ્છક્તિધારકમ્ ।
દેશિકમભિવન્દેઽહં તદ્દિવ્યગુણવિગ્રહમ્ ॥ ૨૦॥

સ્મરણીયા રસોદીમૈર્મહિમવિંશતિઃ ગુરોઃ ।
રાસબિહારિદાસેન રચિતા તત્પ્રસાદતઃ ॥ ૨૧॥

(બ્રજવિદેહી ચતુઃસમ્પ્રદાય શ્રીમહન્ત કાઠિયાબાબા
સ્થાન ગુરુકુલમાર્ગઃ, શ્રીધામ, વૃન્દાવનં (ઉત્તરપ્રદેશ)
વિવિધવિદ્યાવિદ્યોતિતહૃદયાનાં પરમવિપશ્ચિતાં
નિખિલશાસ્ત્રનિષ્ણાતાનામનન્તાનન્તશ્રીસમલઙ્કૃતાનાં
વર્તમાનનિમ્બાર્કાચાર્યાણાં જગદ્ગુરૂણાં

શ્રીરાધાસર્વેશ્વરશરણદેવાચાર્યાણાં )

ઇતિ સ્વામી રાસબિહારીદાસ જી “કાઠિયાબાબા” વિરચિતા
ગુરુમહિમવિંશતિઃ સમાપ્તા ।

Proofread by Mohan Chettoor

---

*Gurumahima Vimshatih*
pdf was typeset on January 28, 2023

Please send corrections to *sanskrit@cheerful.com*